## श्रीरघुनाथकीर्तिपरिसरे रामायणपाठस्यायोजनम्

सर्वैः हिन्दुजनैः रामनवमीपर्वणः आयोजनं सम्पूर्णभारते श्रद्धापूर्वकं क्रियते, सर्वेषु मन्दिरेषु रामायणस्य पाठम् अस्मिन् अवसरे जनाः कुर्वन्ति, अर्थात् रामायणसम्बध्दा अनेके कार्यक्रमाः समयोज्यन्ते, केन्द्रीयसंस्कृतविश्वविद्यालयस्य सर्वेषु परिसरेषु अपि अस्य कार्यक्रमस्य आयोजनमभवत्, तदनुगुणं केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरेणापि रामायणपाठस्यायोजनं निदेशकमहोदयानामध्यक्षत्वे कृतम्, शास्त्रोक्तविधिना पूजनकार्यं वेदविभागस्य डॉ. अंकुरवत्समहोदयेन सह सर्वैः छात्रैः सम्पादितम्। मुख्ययजमानस्य भूमिकायाम् आचार्यद्वितीयवर्षस्य व्याकरणस्य छात्रः श्रीअनिलभट्ट आसीत्। विविधमन्त्रैः मंगलपद्यैश्च भगवतः रामस्य समर्चनं कृतम्। तदनन्तरं सर्वैः 9 वादनाद् रामायणस्य सुन्दरकाण्डस्य पाठः समारब्धः, स च पाठ : सायं 3 वादनपर्यन्तं प्राचलत्, पाठस्य सम्पूर्तिः रामायणार्तिक्येन समभवत्। सर्वे प्राध्यापकाः छात्राश्च भगवतो रामस्य प्रसादसेवनेन आनन्दनिमग्ना अभवन्। तदनन्तरं डॉ.दिनेशचन्द्रपाण्डेयमहोदयस्य संयोजने संगीतसन्ध्याकार्यक्रमोऽपि आयोजितः, तदनन्तरं गंगा-आरतीकार्यक्रमस्यान्तर्गते सर्वे छात्राः प्राध्यापकाः निदेशकमहोदयेन सह रामकुण्डगंगातटे गताः तत्र च गंगा-आरतीकार्यक्रमः समाचरितः। अस्मिन् अवसरे निदेशकमहोदयेनापि स्वविचाराः प्रस्तुताः अस्माभिः सर्वे रामादिवत् वर्तितव्यम्, न तु रावणादिवत् एव काव्यशास्त्रेऽपि रामायणस्य दृष्टान्तं प्रस्तुवन्ति काव्यशास्त्रकाराः, रामायणस्य प्रासंगिकता सर्वेषु कालेषु परिव्याप्ता विद्यते अतः रामायणस्य पठनम्, चिन्तनम्, मननम् अस्माभिः कर्त्तव्यम्। एवं तेन अनेके विचाराः तत्र प्रस्तुताः। अनेन प्रकारेण रामायणपाठस्य गंगास्वच्छताकार्यक्रमस्य आयोजनं सफलतापूर्वकं परिसरे संजातम्।



रामायण पाठ के साथ रामकुंड में चलाया स्वच्छता अभियान







# केन्द्रीयसंस्कृतविश्वविद्यालयः
## श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः ,उत्तराखण्डः



# रामायणपाठः

स्थानम् - सम्मेलनकक्षतृतीयतलम्
दिनाङ्कः-30.03.2023



प्रो.रणजीतकुमारबर्मन्
कुलसचिवः



प्रो. पी.वी.बी. सुब्रह्मण्यम्
निदेशकः



प्रो.श्रीनिवासवरखेडी
कुलपतिः

http://www.csu-devprayag.edu.in/ https://www.facebook.com/csudevprayag/